Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८६४-ख

Title ऐन्दवमासमलमासनिर्णयः

Author

Extent ४ Age

Subject धर्मशास्त्रम् . अपूर्णम्

नं० ८७४-घ

पेन्द्वमास मलमास निर्णयः (अपूर्णः)

नं० ८७४-घ 6

पत्राणि 8 (अपूर्णम्)

मा: सूर्योऽब्दस्तकुदिनप्रमाणं मितिः २५।३।१५० अथैकस्मिन्सौरवर्षे चांद्रदिनसंख्यामाह देवज्ञ

भूषणकारः ॥ वर्षैकमध्ये शशिनो दिनानि हिमांशुसप्ताग्निमितानि तज्ज्ञाः ॥ ३७१ सार्द्धद्विवा

णान्वुपलैर्युतेन घटीत्रयेणैव युतान्यथाऊरिति। एवमेवोक्तं भास्कराचार्यैः ॥ रवीन्द्वोर्युतिः।

संयुतिर्यावदन्या विधोर्मास एतत्स्फुटैर्थ्यां ध्रुवात्रमिति· चान्द्रमासलक्षणं च· मस्येते परि

मीयते यावता कालेन चंद्रवृद्धिक्षयोः स चांद्रो मासः यद्वा· चंद्रवृद्धिक्षयाभ्यां स्वयं मस्यते इ

ति मासः तथा च सिद्धांतशिरोमणौ पद्यते· मस्यंते परिमीयंते स्वकलावृद्धिहानितः। मास ए

ते स्मृता मासास्त्रिंशत्तिथिसमन्विता इति· निर्णयसिन्धौ· पक्षयुगात्मश्चान्द्रो मासः॥ स द्वे

धा॥ शुक्लपक्षादिः॥ कृष्णपक्षादिश्च· तथा च त्रिकाण्डमण्डनः॥ चांद्रोऽपि शुक्लपक्षादिः कृष्णा

द्विर्वेति च विधेति । तथा च श्रुतिः ॥ अमावास्यया हि मासान्संपाद्याहरुत्सृजंत्यमावास्यया हि
5 मासान्संपश्यन्ति । पौर्णमास्या मासान्संपाद्याहरुत्सृजन्ति पौर्णमास्या मासान्संपश्यंतीति । अ
स्य वाक्यस्यायमर्थः ॥ अस्ति किंचिदुत्सर्गिणामयनं नाम सात्रं तच्च गवामयनं विकृतिः अतो द्वा स
दशमासेष्वनुष्ठेयं । प्रकृतावेकैकस्मिन्मासे त्रिंशत्सहस्रसोमयागविशेषाणां त्रिंशतामनुष्ठेयत्वा
न्न किंचिदप्यहरुत्स्रष्टुं शक्यते तद्विकृतावपि प्राप्तौ प्रतिमासमेकैकस्मिन्नह्नि सोमयागप
रित्यागो विधीयते । तत्र कतममहरुत्स्रष्टव्यमिति विवक्षायामिदमुच्यते । अमावास्यायामनु
ष्ठेयेन यागेन पूर्वमासं परिसमाप्योत्तरस्यादिभूतमहरुत्स्रष्टव्यमिति विधायार्थवादे प्रसिद्धवा
चिना हि शब्देन मासस्य द्वैविध्यं श्रुतौ प्रतिपादितं तदयनसत्रविषयपरमेवेति । देशभेदेन ५

द्वैविध्यव्यवस्थामाह· कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन· येपीच्छंति न तेषामपीष्टो विन्ध्य
स्य दक्षिणे इति विन्ध्यदक्षिणे कृष्णादिनिषेधादुत्तरतो द्वयोरप्यनुज्ञा गम्यते· तत्रापि शुक्लादिर्मु
ख्यः । कृष्णादिर्गौणः । शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चान्द्रसम्वत्सरारम्भोक्तेः ॥ तदुक्तं दीपिकायां·
चान्द्रोब्दो मधुशुक्लगप्रतिपदारंभ इति· ये कृष्णादिमन्यन्ते तेषां संवत्सरारम्भो मिद्यते· अतः शु
क्लादिर्मुख्यः कृष्णादिर्गौणः ॥ कृष्णादिना मलमासासम्भवाच्च· यत्तु शुक्लादिरमान्तः कृष्णा
दिः पूर्णिमान्त इत्युक्तं स्यादेतत्· एषा संवत्सरस्य प्रथमा रात्रिर्या फाल्गुनी पौर्णमासीत्यादौ· आश्व
युक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने· मासि भाद्रपदे ष्म्यामित्यादि दर्शितवाक्येषु यद्यपि चैत्रा
दिपक्षाणां पूर्णिमान्तमासे पि शक्तिर्दृश्यते· तथापि चान्द्रमासेत्यादिसामान्यशास्त्राणां चैत्रमा

6 वैशाखेत्यादिविशेषणानांच प्रसिद्धिश्शुक्लादिमासएव· पक्षौस्वर्भानवरैश्शुक्लकृष्णौमासस्तुतावुभावि
तिकोशकृतापिसावयवशुक्लपदस्योभयसंख्यानंकृतंमतमुद्भाव्यशुक्लादिरेव· किंच· रवीन्द्वोर्युतेःसंयुतियो
वदन्याविधोर्मासइत्यादिलक्षणवाक्येभ्यो ब्रह्मगुप्ताद्याचार्योक्तचैत्रादिलक्षणस्यशुक्लादिमासएवसं
गतत्वाच्च· मेषमसंक्रान्तिःशशिमासेभवतिसहिचैत्रः। एवंवैशाखाद्यावृषादिसंक्रान्तियोगेनेति
शुक्लादिचैत्रादौमेषादिसंक्रान्तिरावश्यकी· शुक्लादिसंज्ञकलादीनांवामासविशेषाणांचैत्रादिसंज्ञा
नक्षत्रप्रयुक्ता· पुष्ययुक्तापौर्णमासीपौषीमासेतुयत्रसा· नाम्नासपौषोमाघाद्याश्चैवमेकादशापरे·
इतिकोशात् यस्मिन्मासेपौर्णमासीचित्रानक्षत्रेणयुज्यतेसचैत्रः एवंवैशाखादिरुन्नेयः ^ चित्राविशाखा(६
दियोगस्योपलक्षणत्वात्· क्वचिच्चित्रादिप्रत्यासन्नस्वात्यनुराधादियोगेपिचैत्रवैशाखादिसंज्ञानविरु(

×ननुचित्राद्यन्यतरयोगस्यपौर्णमास्यन्तरेपिसंभवाद्व्यभिचारः। मैवं। मेषादौरविसंक्रान्तिप्रयुक्तदर्शान्तचान्द्रमासान्तःपातिचित्रास्वात्याद्य
न्यतरयुक्तपौर्णमासीयुक्तचान्द्रमासत्वस्यविवक्षितत्वात्· २

ध्यते· चैत्रादिमासवर्णनं तानो चित्रादिनक्षत्रद्वंद्वं प्रयोजकं· भाद्रपदाश्वयुज्योस्तु शततभिषग्रेवत्यादि-
त्रिकं कार्त्तिकार्त्तिकादिमाघांतानां कृत्तिकादिद्वंद्वं· फाल्गुणस्य तु पूर्वाफाल्गुण्यादित्रयमिति विवेकः।
तथा च संकर्षणकाण्डे· द्वे द्वे चित्रादितारागणं परिवर्तेनुसंगमे· मासाश्चैत्रादयो ज्ञेयास्त्रिकैः षष्ठ-
व्यवन:४ न्त्यसप्तमा इति· अन्यत्रापि· अन्त्योपान्त्यो त्रिभौ ज्ञेयौ फाल्गुणश्च त्रिभो मतः। शेषा मासा द्विभा ज्ञेयाः-
कृत्तिकादिव्यवस्थयेति क्वा केचन मासि भाद्रपदे ष्टम्यां कृष्णपक्षेऽर्द्धरात्रके· भवेत्प्रजापतेऋक्षं जयंती-
त्यादि नामसा स्मृतैं मीच· अत्रापि जयंत्या भाद्रपदांतर्गतत्वे मासस्य पूर्णिमांतत्वं गमयति· शिष्टाचारतो व्यव-
स्थाद्रष्टव्या· मलमासविषये तु शुक्लादिचान्द्रमासस्यैव ग्रहणं नेतत्तत्कर्मपरत्वसादेः। अन्यथा म- चतिथिरूसेव
लमासासंभवादित्यलं पल्लवितेन प्रकृतमनुसरामः॥ इति मलमासहेतुभूतैः सौरैन्दवमाससनिर्णयः। कृष्णादिमि सादिना

अथ मलमासः एकसंक्रान्तिरहितः सितादिर्दर्शान्तो मासो मलमासः। एकसंक्रान्तिरहितं चासंक्रान्तत्वेन संक्रान्तिद्वयवत्त्वेन च भवति। स द्वेधा। अ-
धिमासः क्षयमासश्च। काठकगृह्ये। यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा। मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशेति ।

7 ॥ अरण्यहेरम्बमयोगुरूणां पदाम्बुजे व्याससमं भजेन्दु स्तुः ॥ कर्तुं प्रवृत्तो ह्यिगतोऽस्मि प्रसाद्दत्तो मलिम्लुचस्येव वि-
वेकमाद्ये ॥ १ ॥ अथाधिकमासः। तस्य स्वरूपं ब्रह्मसिद्धान्तेऽभिहितं। चान्द्रो मासो ह्यसंक्रान्तो मलमासः प्रकीर्ति-
तः। मलत्वं च कालाधिक्यात्। अथर्वगृह्यपरिशिष्टे। मलं वदन्ति कालस्य मासं कालविदोऽधिकमिति। का-
लाधिक्यं च विष्णुधर्मोत्तरे दर्शितं। सौरेणाब्दस्तु मानेन यदा भवति भार्गव। सावनेन तु तन्मानेन दिनषट्कं न
पूर्यते। दिनरात्राश्च तेराम प्रोक्ताः संवत्सरेण षट्। सौरसंवत्सरस्यान्ते मानेन शशिजेन तु। एकादशाति-
रिच्यन्ते दिनानि भृगुनंदन। वर्षद्वये सार्धमासे तस्मान्मासोऽतिरिच्यते। स चाधिमासकः प्रोक्तः काम्यक-
र्मसु गर्हित इति। अयमर्थः। सौरसंवत्सरः षड्भिर्दिनैः सावनादतिरिच्यते। एकादशभिर्दिनैश्चान्द्राद्दति-
रिच्यते। तथा च चान्द्रसंवत्सरद्वयात्सौरसंवत्सरद्वयं द्वाविंशत्यादिनैरधिकं भवति। तत ऊर्ध्वं सौरमा-
सार्धकं चान्द्रान्मासार्धकान्तादष्टैः सप्तभिर्दिनैरतिरिच्यते। तथा च मिलित्वा दिनार्धन्यूनो मासो भवति। 6
सोऽयमधिको मास इति। अवशिष्टदिनार्धस्य पञ्चयप्रोक्तकालान्तर्वृद्धषोडशभिर्दिनैः संपद्यते। अत एव
सिद्धान्तेऽभिहितं। द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण पतति ह्यधिमासकः॥

ति॰ न च कालाधिक्यमात्रेण मलत्वेति यथा दिनवृद्धेरपि मलत्वं प्रसज्येतेति शंकनीयं॰ कालाधिक्ये सति नपुंसके
न मलत्वांगीकारात्॰ नपुंसकत्वं च ज्योतिःशास्त्रेऽभिहितं॰ असंक्रांतो हि यो मासः कदाचित्तिथिवृद्धितः कालां
तरात्समायाति स नपुंसक इष्यत इति॰ पुरुषस्य सूर्यस्य तत्राभावान्नपुंसकत्वं॰ तदपि तत्रैवोक्तं॰ अरुणः सूर्यो
भानुस्तपनश्चंडो रविर्गभस्तिश्च॰ अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च॰ एते द्वादशसूर्या माघाद्येषूदयं
ति मासेषु॰ निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः। मासेषु द्वादशस्वादित्यास्तपंते हि यथाक्रमं॰ नपुं
सकेऽधिके मासि मंडलं तपते रवेरिति मलिम्लुचत्वं च न सरणं सैत्सकैरसंक्रांतत्वात्॰ तदाह शातातपः॥
वत्सरांतर्गतः पापो यज्ञानां फलनाशकृत्॰ नैरृतैर्यातुधानाद्यैः समाक्रांतो विनाशकैः। मलिम्लुचेः समा
क्रांतं सूर्यसंक्रांतिवर्जितं॰ मलिम्लुचं विजानीयात्सर्वकर्मसु गर्हितमिति॰ ननु द्वात्रिंशद्भिर्गतैर्मासैरित्यनेन
वचनेन येयं कालेयत्तादर्शिता सा वचनांतरेण विरुध्यते॰ तथा च काठकगृह्यं॰ यस्मिन्मासे न संक्रांतिः संक्रां
तिद्वयमेव च॰ मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेदिति॰ नायं दोषः। द्वयोर्वचनयोर्भिन्नविषयत्वात् ज्यो
तिःशास्त्रप्रसिद्धं मध्यममानमाश्रित्य द्वात्रिंशद्भिरिति वचनं प्रवृत्तं॰ यस्मिन्मास इति तु स्फुटमानमाश्रित्य प्रवृ

सं॰ ननु मध्यमप्रमाणेन सप्तदशो ऽधिमासो ज्योतिःशास्त्रे व्यवहारयोग्यो युज्यते॰ ननु श्रौते तस्मात्तेस्य शुक्लप्रतिपदादिदर्शा
8 न्तत्वनियमासंभवात्॰ षोडशाभिर्दिनैः घटिकाचतुष्टयेनाधिकैश्चोपेतेषु द्वात्रिंशन्मासेषु गतेषु सोऽधिकमासो विधी
यते तत्र यदि दर्शान्ता मासा विवक्षितास्तदा शुक्लद्वितीयायां च घटिकाचतुष्टये गते ऽधिकमासस्योपक्रमः प्रसज्ये
त॰ अथ यथानियतोपक्रमावसाना द्वात्रिंशन्मासा न विवक्ष्येरन्॰ तदापि शुक्लप्रतिपदादिदर्शान्तो मास इत्येष नियमो
न लभ्यते॰ श्रौते तस्मात्तद्व्यवहारयोग्यो नित्याधिमासः इति नियमः। तथा च लघुहारीतः। इन्द्राग्नी यत्र हूयेते मासा
दिः स प्रकीर्तितः अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ॰ तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन॰ आद्यो
मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः। अयमर्थः। दर्शेष्ट्यां मासयाजिना शुक्लप्रतिपदादिदर्शेष्टिदेवौ विंद्रा

८